International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 167-172
© 2026 IJMH
www.themultijournal.com
Received: 28-05-2026
Accepted: 24-06-2026
Publish : 25-06-2026

**डॉ. लोकेश**
सहायकाचार्य,शिक्षापीठ,
श्री लाल बहादुर शास्त्री राष्ट्रीय-
संस्कृत विश्वविद्यालय, नई दिल्ली

**Correspondence:**
**डॉ. लोकेश**
सहायकाचार्य,शिक्षापीठ,
श्री लाल बहादुर शास्त्री राष्ट्रीय-
संस्कृत विश्वविद्यालय, नई दिल्ली

# ज्ञानात् आत्मबोधपर्यन्तम् : राष्ट्रीयशिक्षानीतौ २०२० भारतीयशिक्षादर्शनस्य पुनराविष्कारः

**डॉ. लोकेश**

**सार: (Abstract)**

एकविंशतितमे शतके शिक्षायाः उद्देश्यं केवलं ज्ञानार्जनं वा रोजगारप्राप्तिः नास्ति, अपितु व्यक्तेः समग्रव्यक्तित्वविकासः, नैतिकचेतनायाः संवर्धनम्, सामाजिकोत्तरदायित्वस्य विकासः तथा आत्मबोधस्य प्राप्तिरपि तस्याः प्रमुखो लक्ष्यः अस्ति। अस्यैव दृष्ट्यौ भारतसर्वकारेण प्रस्तुता राष्ट्रीयशिक्षानीतिः– २०२० भारतीयशिक्षाव्यवस्थायां महत्त्वपूर्णं वैचारिकपरिवर्तनं सूचयति। एषा नीतिः शिक्षां केवलं सूचना-कौशलप्राप्तेः प्रक्रिया इति न मन्यते, अपि तु सा व्यक्तेः बौद्धिक, भावनात्मक, नैतिक, आध्यात्मिक- तथा सांस्कृतिकविकासस्य माध्यमम् इति स्वीकरोति। अस्य दृष्टिकोणस्य मूलम् भारतीयशिक्षादर्शने निहितम् अस्ति, यत्र शिक्षायाः परमलक्ष्यं "सा विद्या या विमुक्तये" इति उक्त्या आत्मबोधस्य मोक्षस्य च प्राप्तिः मन्यते। अस्य शोधलेखस्य उद्देश्यं राष्ट्रीयशिक्षानीतौ २०२० निहितानां भारतीयशिक्षादर्शनस्य मूलतत्त्वानां विश्लेषणं कर्तुं तथा आधुनिकवैश्विकशिक्षापरिप्रेक्ष्ये एषा नीतिः भारतीयज्ञानपरम्परायाः पुनराविष्कारं कथं करोति इति स्पष्टयितुम् अस्ति। अस्मिन् अध्ययने गुणात्मकदस्तावेजविश्लेषणात्मकशोधपद्धतेः उपयोगः कृतः। विश्लेषणस्य आधारः राष्ट्रीयशिक्षानीतिः– २०२०,भारतीयदार्शनिकग्रन्थाः, समकालीनशोधसाहित्यं तथा शिक्षादर्शनसम्बद्धानां प्रमुखविचारकाणां सिद्धान्ताः सन्ति। अध्ययनेन स्पष्टं भवति यत् राष्ट्रीयशिक्षानीतिः– २०२० शिक्षां केवलं ज्ञानार्जनस्य प्रक्रिया इति न मन्यते, अपि तु आत्मबोधेन, चरित्रनिर्माणेन, नैतिकमूल्यैः, बहुविषयकचिन्तनेन, अनुभवाधारिताधिगमेन, सांस्कृतिकचेतनया तथा वैश्विकउत्तरदायित्वेन सह सम्बध्नाति। यद्यपि अस्याः प्रभावीक्रियान्वयने अनेकाः व्यवहारिकाः चुनौतीः सन्ति, तथापि एषा नीतिः भारतीयशिक्षादर्शनस्य पुनः प्रतिष्ठापनाय महत्त्वपूर्णा वैचारिकी पहल इति सिद्ध्यति।

**प्रमुखशब्दाः—** राष्ट्रीयशिक्षानीतिः– २०२०, भारतीयशिक्षादर्शनम्, भारतीयज्ञानपरम्परा, आत्मबोधः, समग्रशिक्षा, मूल्यशिक्षा, शिक्षादर्शनम्।

## १. भूमिका

विश्वस्य इतिहासे प्रत्येकस्मिन् युगे शिक्षायाः समाजनिर्माणे, संस्कृतेः संरक्षणे तथा मानवीयमूल्यानां संवर्धने अत्यन्तं महत्त्वपूर्णा भूमिका आसीत्। कस्यापि राष्ट्रस्य शिक्षाव्यवस्था तस्य दार्शनिकदृष्टेः, सांस्कृतिकपरम्परायाः तथा सामाजिकावश्यकतानां प्रतिबिम्बरूपा भवति। शिक्षा केवलं ज्ञानसंग्रहस्य साधनं नास्ति, अपि तु सा मनुष्यस्य विचारस्य, आचरणस्य, चरित्रस्य, व्यक्तित्वस्य तथा जीवनदृष्टेः निर्माणं कुर्वन्ती निरन्तरा प्रक्रिया अस्ति। भारतीयचिन्तनपरम्परायां शिक्षा केवलं जीवनोपयोगि-कौशलप्राप्तेः माध्यमं न मन्यते, अपितु आत्मविकासस्य आत्मसाक्षात्कारस्य च प्रक्रिया इति स्वीकृता अस्ति। उपनिषत्सु ज्ञानस्य उद्देश्यं केवलं बाह्यजगतः परिचयः नास्ति, अपि तु आत्मनः स्वरूपबोधः सत्यस्य च अनुभूतिः इति प्रतिपादितम्। अत एव भारतीयशिक्षादर्शने "विद्या" इति पदस्य अर्थः केवलं सूचना न, अपि तु सा चेतना अस्ति या मनुष्यं अज्ञानात्, भयात्, संकीर्णभावनाभ्यः तथा बन्धनेभ्यः विमोचयति।

औपनिवेशिककाले भारतीयशिक्षायाः स्वरूपं शनैः शनैः परीक्षाकेन्द्रितं, प्रमाणपत्रप्रधानं तथा रोजगाराभिमुखं जातम्। तस्य परिणामस्वरूपं शिक्षायाः दार्शनिकः मानवीयश्च पक्षः दुर्बलः अभवत्। ज्ञानस्य स्थाने सूचना, चरित्रनिर्माणस्य स्थाने स्पर्धा, आत्मबोधस्य स्थाने प्रमाणपत्राणि प्रमुखत्वेन प्रतिष्ठितानि। एवं शिक्षायाः मूलोद्देश्यः क्रमशः संकुचितः अभवत्। एतादृशे परिप्रेक्ष्ये राष्ट्रीयशिक्षानीतिः– २०२० महत्त्वपूर्णं वैचारिकं परिवर्तनं प्रस्तौति। एषा नीति भारतीयज्ञानपरम्परां, समग्रशिक्षां, बहुविषयाधिगमं, मूल्याधारितशिक्षां, मातृभाषाशिक्षणं, अनुभवाधारिताधिगमं तथा अनुसंधानसंस्कृतिं शिक्षाव्यवस्थायाः मूलाधारत्वेन पुनः प्रतिष्ठापयितुं प्रयतते। विशेषतया एषा नीति शिक्षां केवलम् आर्थिकविकासस्य साधनं न मन्यते, अपि तु मानवविकासस्य, सामाजिकन्यायस्य, सांस्कृतिकपुनर्जागरणस्य तथा आत्मनिर्भरराष्ट्रनिर्माणस्य आधार-रूपेण स्वीकरोति।

अस्य शोधलेखस्य शीर्षकं "ज्ञानात् आत्मबोधपर्यन्तम्" केवलं साहित्यिकाभिव्यक्तिः नास्ति, अपि तु भारतीयशिक्षादर्शनस्य मूलयात्रायाः दार्शनिकप्रतीकम् अस्ति। अत्र "ज्ञानम्" इति पदेन केवलं सूचनानां तथ्यानां वा संग्रहः न विवक्षितः, अपि तु विवेकः, प्रज्ञा, जीवनदृष्टिश्च अभिप्रेता। तथा "आत्मबोधः" इति पदेन व्यक्तेः आन्तरिकचेतना, नैतिकउत्तरदायित्वम् तथा जीवनस्य परमलक्ष्यस्य अनुभूतिः सूच्यते। अतः अयं शोधलेखः राष्ट्रीयशिक्षानीतिं– २०२० भारतीयशिक्षादर्शनस्य पुनराविष्काररूपेण अवगन्तुं प्रयतते।

## २. अध्ययनस्य आवश्यकता तथा औचित्यम्

## (Need and Rationale of the Study)

वर्तमानकाले कृत्रिमबुद्धिमत्ता (Artificial Intelligence), डिजिटलप्रौद्योगिकी (Digital Technology), वैश्वीकरणम् तथा तीव्राः सामाजिकपरिवर्तनाः शिक्षायाः स्वरूपम् अत्यधिकं प्रभावितवन्तः। शिक्षासंस्थासु ज्ञानस्य विस्तारः अभवत्, किन्तु तेन सह नैतिकमूल्यानां ह्रासः, सामाजिकसंवेदनशीलतायाः न्यूनता, मानसिकसन्तुलनस्य समस्या, सांस्कृतिकचेतनायाः क्षयः तथा मानवीयसंबन्धानां जटिलता अपि वर्धिता।

एतादृश्यां परिस्थितौ एषः प्रश्नः अत्यन्तं विचारणीयः भवति— किं केवलं यान्त्रिकदक्षतैव शिक्षायाः परमलक्ष्यम् अस्ति? किं ज्ञानस्य अर्थः केवलं सूचनासंग्रहः एव? किं शिक्षा मनुष्यं श्रेष्ठतरं मानवम् अपि निर्माति? एतेषां प्रश्नानामुत्तराणि भारतीयशिक्षादर्शने निहितानि सन्ति। भारतीयपरम्परायां शिक्षायाः परमलक्ष्यम् आत्मबोधः, आत्मानुशासनम्, लोककल्याणम् तथा सर्वजनहितम् इति स्वीकृतम् अस्ति।

राष्ट्रीयशिक्षानीतिः– २०२० भारतीयज्ञानपरम्परां आधुनिक-शिक्षायाः सह समन्वययितुं प्रयतते। अतः आवश्यकम् अस्ति यत् एषा नीति केवलं प्रशासनिकदस्तावेजरूपेण न परीक्ष्येत, अपि तु दार्शनिकदृष्ट्या अपि सम्यक् विश्लेष्येत। प्रस्तुतम् अध्ययनम् अस्याः आवश्यकतायाः पूर्तिं करोति तथा एतत् ज्ञातुं प्रयतते यत् भारतीयशिक्षादर्शनस्य के के मूलतत्त्वानि अस्याम् नीतौ पुनः प्रतिष्ठापितानि सन्ति, तथा ते समकालीनशिक्षायाः विविधचुनौतीनां समाधानं कियत्पर्यन्तं प्रस्तुतुं समर्थाः सन्ति।

## ३. अध्ययनस्य उद्देश्याः

## (Objectives of the Study)

अस्य शोधलेखस्य प्रमुखाः उद्देश्याः इमे सन्ति—

1. राष्ट्रीयशिक्षानीतेः– २०२० दार्शनिकाधाराणां विश्लेषणं कर्तुम्।
2. भारतीयशिक्षादर्शनस्य प्रमुखसिद्धान्तानां अध्ययनं कर्तुम्।
3. "ज्ञानम्" तथा "आत्मबोधः" इत्येतयोः भारतीयदृष्ट्या स्वरूपं स्पष्टीकर्तुम्।
4. राष्ट्रीयशिक्षानीतौ– २०२० भारतीयज्ञानपरम्परायाः समावेशस्य विश्लेषणं कर्तुम्।
5. समकालीनशिक्षायाः सन्दर्भे भारतीयशिक्षादर्शनस्य प्रासङ्गिक-तायाः मूल्याङ्कनं कर्तुम्।

## ४. अध्ययनस्य पद्धतिः

## (Research Methodology)

प्रस्तुतम् अध्ययनं गुणात्मकशोधपद्धत्याः (Qualitative Research) तथा दस्तावेजविश्लेषणपद्धत्याः (Documentary Analysis) आधारेण सम्पन्नम् अस्ति। अस्मिन् अध्ययने राष्ट्रीयशिक्षानीतिः– २०२०, भारतीयदार्शनिकग्रन्थाः, शिक्षादर्शन-सम्बद्धाः प्रमाणग्रन्थाः, शोधलेखाः तथा समकालीनम् अकादमिक-साहित्यं सम्यग् विश्लेषितम् अस्ति।

अध्ययने व्याख्यात्मकया (Interpretative) विश्लेषणात्मकया (Analytical) च पद्धत्या नीतेः दार्शनिकतत्त्वानि भारतीयज्ञान-परम्परायाः परिप्रेक्ष्ये सम्यग् विवेचितानि। अस्य अध्ययनस्य मुख्यप्रयोजनं केवलं नीतेः वर्णनं न, अपि तु तस्याः दार्शनिकाधारस्य विश्लेषणं तथा भारतीयशिक्षादर्शनेन सह तस्य सम्बन्धस्य स्पष्टीकरणम् अस्ति।

## ५. प्रमुखघटकानां दार्शनिकविश्लेषणम्

### ५.१ ज्ञानम् (Knowledge): सूचनातः प्रज्ञापर्यन्ता यात्रा

भारतीयदर्शने "ज्ञानम्" इति पदस्य अर्थः केवलं तथ्यसङ्ग्रहः, प्रदत्तानामं सङ्ग्रहः अथवा सूचनासङ्ग्रहः नास्ति। ज्ञानं तत् प्रकाशरूपं तत्त्वम् अस्ति, यत् मनुष्यस्य विवेकं जागरयति तथा सत्यस्य, न्यायस्य, करुणायाश्च मार्गे प्रेरयति।

उपनिषत्सु पराविद्या तथा अपराविद्या इत्येतयोः उल्लेखः ज्ञानस्य अस्य व्यापकदृष्टिकोणस्य द्योतकः अस्ति। अपराविद्या लौकिकज्ञानं ददाति, परन्तु पराविद्या आत्मनः ब्रह्मणश्च स्वरूपस्य बोधं कारयति। अतः भारतीयपरम्परायां ज्ञानस्य परमफलम् आत्मबोधः एव मन्यते।

अद्यतनशिक्षाव्यवस्थायां सूचनानां प्रचुरता दृश्यते, किन्तु विवेकस्य, प्रज्ञायाः तथा नैतिकचिन्तनस्य विकासः अपेक्षया न्यूनः अस्ति। राष्ट्रीयशिक्षानीतिः– २०२० अस्य असन्तुलनस्य निवारणार्थं ज्ञानं बहुआयामानुभवैः, चिन्तनेन, सृजनशीलतया तथा नैतिकउत्तरदायित्वेन सह सम्बध्नाति।

### ५.२ आत्मबोधः (Self-Realisation): शिक्षायाः परमलक्ष्यम्

भारतीयशिक्षादर्शनस्य परमः उद्देश्यः आत्मबोधः अस्ति। आत्मबोधस्य अर्थः केवलम् आध्यात्मिकानुभूतिः न, अपि तु स्वस्य शक्तीनां, सीमानां, उत्तरदायित्वानां तथा जीवनस्य परमलक्ष्यस्य यथार्थज्ञानम् अपि अस्ति।

यदा मनुष्यः स्वात्मानं सम्यक् जानाति, तदा एव सः समाजेन, प्रकृत्या तथा सम्पूर्णमानवसमाजेन सह सम्यक् सामञ्जस्यं स्थापयितुं समर्थः भवति।

स्वामी विवेकानन्दः अवदत् यत्— "शिक्षा मनुष्ये निहितायाः पूर्णतायाः अभिव्यक्तिः अस्ति।"

महात्मा गान्धी शिक्षां शरीरस्य, मनसः, आत्मनश्च समविकासस्य साधनम् अमन्यत।

श्रीअरविन्दः शिक्षां चेतनायाः उत्कर्षस्य प्रक्रिया इति प्रतिपादितवान्।

एतेषां सर्वेषां चिन्तकानां मतानां केन्द्रबिन्दुः आत्मबोधः एव अस्ति। राष्ट्रीयशिक्षानीतिः– २०२० अपि समग्रविकासेन, मूल्याधारितशिक्षया तथा अनुभवाधारिताधिगमेन अस्य आदर्शस्य पुनः प्रतिष्ठापनाय प्रयतते।

**५.३भारतीयशिक्षादर्शनम् (Indian Philosophy of Education): समग्रजीवनस्य आदर्शः**

भारतीयशिक्षादर्शनस्य मूलाधारः अयं यत् शिक्षा व्यक्तेः, समाजस्य तथा प्रकृतेः मध्ये सामञ्जस्यपूर्णं सम्बन्धं स्थापयेत्। अत्र शिक्षा केवलं बौद्धिकप्रशिक्षणस्य साधनं न, अपि तु समग्रजीवनस्य साधना अस्ति। वेदाः, उपनिषदः, भगवद्गीता, बौद्ध-जैनपरम्पराः, गुरुकुलव्यवस्था तथा आधुनिकभारतीयविचारकानां चिन्तनम् भारतीयशिक्षादर्शनस्य विविधान् आयामान् प्रकाशितवन्ति।

भारतीयशिक्षादर्शनस्य प्रमुखतत्त्वानि इमानि सन्ति—

- समग्रव्यक्तित्वस्य विकासः।
- नैतिकस्य आध्यात्मिकस्य च उन्नयनम्।
- अनुभवाधारितम् चिन्तनपरकं च अधिगमम्।
- प्रकृत्या सह सह-अस्तित्वभावः।
- लोककल्याणस्य विश्वबन्धुत्वस्य च भावना।
- आत्मानुशासनम् तथा स्वाध्यायः।

राष्ट्रीयशिक्षानीतिः– २०२० एतानि तत्त्वानि केवलम् अतीतस्य पुनरावृत्तिरूपेण न स्वीकरोति, अपि तु आधुनिकसमाजस्य आवश्यकतानुसारं तेषां पुनः सृजनं समन्वयं च करोति। अतः एषा नीति भारतीयशिक्षादर्शनस्य मूलभावनां समकालीनशिक्षाव्यवस्थायां पुनः प्रतिष्ठापयितुं महत्त्वपूर्णं प्रयत्नं करोति।

६. राष्ट्रीयशिक्षानीतौ २०२० भारतीयशिक्षादर्शनस्य पुनराविष्कारः

राष्ट्रीयशिक्षानीतिः– २०२० केवलं प्रशासनिकः अथवा शैक्षिकसुधारसम्बद्धः दस्तावेजः नास्ति, अपि तु सा भारतीयशिक्षायाः तां मूलभावनां पुनः प्रतिष्ठापयितुं प्रयतते, या औपनिवेशिकशिक्षापद्धत्याः, परीक्षाकेन्द्रितदृष्टेः तथा बाजारीकरण-प्रधानशिक्षायाः प्रभावेण शनैः शनैः क्षीणा अभवत्। अस्याः नीतेः वैशिष्ट्यमिदम् अस्ति यत् सा भारतीयज्ञानपरम्परां केवलम् अतीतस्य गौरवरूपेण न प्रस्तौति, अपि तु वर्तमानस्य भविष्यस्य च शिक्षायाः सुदृढं वैचारिकाधारम् इति स्वीकरोति।

अत्र "पुनराविष्कारः" इति पदस्य विशेषं महत्त्वम् अस्ति। अस्य अर्थः अतीतस्य यथावत् पुनरावृत्तिः न, अपि तु भारतीयशिक्षादर्शनस्य मूलसिद्धान्तानां आधुनिकवैश्विकावश्यकतानुसारं पुनः समन्वयः तथा नूतनरूपेण प्रस्तुतीकरणम् अस्ति। एतस्मात् कारणात् राष्ट्रीयशिक्षानीतिः– २०२० भारतीयपरम्परायाः आधुनिकतायाश्च मध्ये सन्तुलितं संवादं स्थापयति।

**६.१ समग्रशिक्षा : भारतीयशिक्षादर्शनस्य मूलाधारः**

भारतीयशिक्षादर्शनं मनुष्यं सदैव समग्रस्वरूपेण पश्यति। तैत्तिरीयोपनिषदि प्रतिपादितः पञ्चकोशसिद्धान्तः—अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयश्च—एतत् स्पष्टयति यत् मनुष्यस्य विकासः केवलं बौद्धिकः न भवेत्, अपि तु शारीरिकः, मानसिकः, भावनात्मकः, नैतिकः तथा आध्यात्मिकश्च भवेत्।राष्ट्रीय-शिक्षानीतिः– २०२० एतमेव सिद्धान्तं आधुनिकभाषया समग्र-विकासः (Holistic Development) इति रूपेण प्रतिपादयति। नीतौ स्पष्टतया उक्तम् अस्ति यत् शिक्षायाः उद्देश्यं केवलं बौद्धिकविकासः न, अपि तु सामाजिकः, भावनात्मकः, नैतिकः, सृजनात्मकः तथा व्यवहारिकविकासोऽपि अस्ति।

अतः एषा नीति भारतीयशिक्षादर्शनस्य तं मूलसिद्धान्तं पुनः प्रतिष्ठापयति यत्—

"मनुष्यनिर्माणमेव राष्ट्रनिर्माणस्य मूलाधारः अस्ति।"

**६.२ ज्ञानस्य कौशलस्य च समन्वयः**

औपनिवेशिकशिक्षाव्यवस्थायां ज्ञानस्य कर्मणश्च मध्ये स्पष्टः भेदः स्थापितः। तस्य परिणामस्वरूपं शिक्षायाः प्रमुखः उद्देश्यः परीक्षासफलता तथा रोजगारप्राप्तिः एव अभवत्।

भारतीयशिक्षादर्शने तु ज्ञानं जीवनेन सह अविच्छिन्नरूपेण सम्बद्धम् अस्ति। महात्मा गान्धिनः नवतालीम, रवीन्द्रनाथठाकुरस्य प्राकृतिकशिक्षा, श्रीअरविन्दस्य समग्रशिक्षा तथा स्वामिविवेका-नन्दस्य व्यक्तित्वविकासप्रधानं शिक्षादर्शनम्—एते सर्वे अपि प्रतिपादयन्ति यत् शिक्षा अनुभवेन, श्रमेण तथा जीवनव्यवहारेण सह सम्बद्धा भवेत्।

राष्ट्रीयशिक्षानीतिः– २०२० अपि एतमेव विचारं प्रवर्धयन्ती—

- व्यावसायिकशिक्षाम्,
- कौशलविकासम्,
- अनुभवाधारिताधिगमम्,
- अभ्यासप्रशिक्षणम् (Internship),
- परियोजनाधारिताधिगमम्,
- कला-शिल्पाधारितशिक्षां च

विद्यालयशिक्षायाः अभिन्नाङ्गत्वेन स्वीकरोति।

अयं परिवर्तनः केवलं पाठ्यक्रमस्य न, अपि तु सम्पूर्णशिक्षादर्शनस्य परिवर्तनम् अस्ति।

**६.३ मातृभाषा भारतीयभाषाश्च : सांस्कृतिकचेतनायाः पुनः प्रतिष्ठा**

भारतीयज्ञानपरम्परायां भाषा केवलं संप्रेषणस्य साधनं नास्ति, अपि तु संस्कृतेः, चिन्तनस्य, ज्ञानस्य च वाहिका अस्ति। समाजस्य भाषा तस्य इतिहासस्य, अनुभवानां, दर्शनस्य तथा जीवनमूल्यानां संरक्षिका भवति।

राष्ट्रीयशिक्षानीतिः– २०२० प्रारम्भिकशिक्षायां मातृभाषायाः अथवा स्थानीयभाषायाः उपयोगे विशेषं बलं ददाति। एषः निर्णयः केवलं भाषासम्बद्धः नास्ति, अपि तु भारतीयशिक्षादर्शनस्य तस्य

सिद्धान्तस्य पुनः प्रतिष्ठापनम् अस्ति, यस्यानुसारं शिक्षा तदा एव प्रभावशालिनी भवति यदा सा शिक्षार्थिनः सांस्कृतिकपरिवेशेन सह सम्बद्धा भवति।

एषा नीति भारतीयभाषाणां संरक्षणस्य ज्ञानस्य लोकव्यापीकरणस्य (Democratisation of Knowledge) च दिशि महत्त्वपूर्णं पदम् अस्ति।

### ६.४ मूल्यशिक्षा तथा चरित्रनिर्माणम्

आधुनिकशिक्षायाः प्रमुखासु समस्यासु एका एषा अस्ति यत् ज्ञानस्य विस्तारः जातः, किन्तु नैतिकमूल्यानां समुचितः विकासः नाभवत्। भारतीयशिक्षादर्शने ज्ञानम् आचरणं च कदापि पृथक् न मन्येते। उपनिषदां "सत्यं वद, धर्मं चर" इति उपदेशः तथा भगवद्गीतायाः निष्कामकर्मयोगः शिक्षां नैतिकजीवनस्य आधारत्वेन प्रतिपादयतः।

राष्ट्रीयशिक्षानीतिः– २०२० अपि निम्नलिखितेषु मूल्येषु विशेषं बलं ददाति—

- सत्यनिष्ठा,
- सहिष्णुता,
- संवेदनशीलता,
- सामाजिकउत्तरदायित्वम्,
- पर्यावरणचेतना,
- संवैधानिकमूल्यानि,
- वैश्विकनागरिकताभावः।

एवं एषा नीति शिक्षां केवलं ज्ञानप्राप्तेः साधनं न मन्यते, अपि तु चरित्रनिर्माणस्य प्रभावी प्रक्रिया इति पुनः प्रतिपादयति।

### ६.५ बहुविषयकशिक्षा : भारतीयचिन्तनस्य आधुनिकाभिव्यक्तिः

प्राचीनभारते तक्षशिला, नालन्दा, विक्रमशिला इत्यादिषु प्रसिद्धविद्यापीठेषु ज्ञानं पृथक्-पृथक् विषयेषु कठोररूपेण न विभक्तम् आसीत्। दर्शनम्, आयुर्वेदः, गणितम्, व्याकरणम्, ज्योतिषम्, कलाः, राजनीतिशास्त्रं च परस्परसम्बद्धरूपेण अध्याप्यन्ते स्म। एषा परम्परा ज्ञानस्य समग्रदृष्टिं प्रकाशयति।

राष्ट्रीयशिक्षानीतिः– २०२० एतस्याः परम्परायाः आधुनिकरूपं बहुविषयकशिक्षा (Multidisciplinary Education) इति नाम्ना पुनः प्रतिष्ठापयति। अस्याः नीतेः अनुसारं विद्यार्थी स्वस्य रुचिं, योग्यता च अनुसृत्य विविधविषयाणां अध्ययनं कर्तुं शक्नोति।

अद्यतनजीवने समस्याः बहुआयामिकाः सन्ति। तासां समाधानाय केवलं एकविषयस्य ज्ञानं पर्याप्तं न भवति। अतः बहुविषयकशिक्षा विद्यार्थिनां नवोन्मेषशक्तिं, सृजनशीलतां, तार्किकचिन्तनं तथा समस्यासमाधानक्षमतां विकसितुं सहायिका भवति। एतत् भारतीयशिक्षादर्शनस्य समग्रदृष्टेः आधुनिकरूपमेव अस्ति।

### ६.६ अनुसंधानसंस्कृतिः तथा भारतीयज्ञानपरम्परा

भारतीयज्ञानपरम्परा केवलम् आध्यात्मिकचिन्तने सीमिता नासीत्। आर्यभटः, चरकः, सुश्रुतः, पाणिनिः, कात्यायनः, भास्कराचार्यः इत्यादयः महर्षयः वैज्ञानिकचिन्तनस्य, तर्कविश्लेषणस्य तथा अनुसन्धानस्य समृद्धां परम्पराम् अवर्धयन्। राष्ट्रीयशिक्षानीतिः– २०२० अनुसंधानसंस्कृतेः विकासाय विशेषं महत्त्वं ददाति। राष्ट्रीयअनुसंधानप्रतिष्ठानस्य (National Research Foundation – NRF) स्थापनायाः प्रस्तावः अस्याः दिशि महत्त्वपूर्णः प्रयासः अस्ति। एषा नीति अनुसंधानं केवलं विश्वविद्यालयस्तरे सीमितं न करोति, अपि तु विद्यालयस्तरात् एव विद्यार्थिषु जिज्ञासा, प्रश्नकर्तुं प्रवृत्तिः, वैज्ञानिकदृष्टिः, स्वतन्त्रचिन्तनक्षमता च विकसितुं प्रेरयति। एवं भारतीयज्ञानपरम्परायाः अनुसन्धानप्रधानभावना आधुनिक-शिक्षायां पुनः प्रतिष्ठाप्यते।

## ७. वर्तमानकाले विषयस्य प्रासङ्गिकता

वर्तमानवैश्विकपरिप्रेक्ष्ये राष्ट्रीयशिक्षानीतिः-२०२० भारतीयशिक्षा-दर्शनस्य पुनः प्रतिष्ठापनस्य दृष्ट्या अत्यन्तं प्रासङ्गिका वर्तते। तस्याः प्रासङ्गिकता निम्नलिखितेषु पक्षेषु विशेषतया दृश्यते—

### (क) कृत्रिमबुद्धिमत्तायाः युगे मानवीयमूल्यानाम् आवश्यकता

अद्य कृत्रिमबुद्धिमत्ता (AI) अनेकानि बौद्धिककार्याणि कर्तुं समर्था अस्ति, किन्तु करुणा, संवेदना, नैतिकविवेकः, आत्मचिन्तनं च तया प्रतिस्थापयितुं न शक्यते। भारतीयशिक्षादर्शनं एतेषां मानवीय-गुणानां विकासं शिक्षायाः अनिवार्यं भागं मन्यते। अतः एषः दृष्टिकोणः आधुनिकयुगे विशेषतया उपयुक्तः अस्ति।

### (ख) मानसिकस्वास्थ्यं तथा आत्मबोधः

अद्यतनकाले स्पर्धा, तनावः, एकाकित्वम्, डिजिटलसाधनेषु अत्यधिकासक्तिः च विद्यार्थिनां मानसिकस्वास्थ्यं प्रतिकूलतया प्रभावितवन्ति। भारतीयशिक्षादर्शनं आत्मबोधं, योगाभ्यासं, ध्यानं, आत्मानुशासनं तथा सन्तुलितजीवनदृष्टिं महत्त्वपूर्णं मन्यते। एते सिद्धान्ताः मानसिकस्वास्थ्यस्य संरक्षणे विशेषोपकारकाः भवन्ति।

### (ग) वैश्वीकरणं तथा सांस्कृतिक गौरवम्

वैश्वीकरणेन अनेकाः नूतनाः अवसराः प्राप्ताः, तथापि सांस्कृतिकस्वरूपस्य संरक्षणस्य चुनौती अपि वर्धिता। राष्ट्रीयशिक्षा-नीतिः– २०२० भारतीयभाषाणां, स्थानीयज्ञानस्य, कलानां, संस्कृतेः तथा परम्पराणां संरक्षणं प्रोत्साहयति। एतेन विद्यार्थिनां सांस्कृतिकगौरवं तथा आत्मविश्वासः दृढो भवति।

### (घ) सततविकासः (Sustainable Development)

भारतीयदर्शनं प्रकृतिं केवलं उपभोगस्य वस्तु न मन्यते, अपि तु जीवनस्य सहचरीम् इति पश्यति। अतः पर्यावरणसंरक्षणम्, जैवविविधतायाः रक्षणम्, सन्तुलितजीवनशैली तथा उत्तरदायि-नागरिकत्वम् इत्यादयः विषयाः राष्ट्रीयशिक्षानीतौ विशेषमहत्त्वेन स्वीकृताः सन्ति।

### (ङ) व्यवसायतः परं जीवनकौशलानि

अद्य केवलं उपाधिः (Degree) पर्याप्ता नास्ति। नवोन्मेषः, नेतृत्वक्षमता, संवादकौशलम्, सहकार्यभावः, सृजनशीलता, समस्या-समाधानक्षमता च अत्यावश्यकाः गुणाः सन्ति। भारतीयशिक्षादर्शनं एतान् गुणान् समग्रव्यक्तित्वविकासस्य आवश्यकाङ्गत्वेन स्वीकरोति। अतः राष्ट्रीयशिक्षानीतिः– २०२० भविष्यस्य शिक्षायाः एकं सन्तुलितं दूरदर्शिनं च प्रतिमानं प्रस्तौति।

## ८. समालोचनात्मकं विश्लेषणम्

राष्ट्रीयशिक्षानीतिः– २०२० भारतीयशिक्षादर्शनस्य पुनराविष्कारे महत्त्वपूर्णः प्रयासः अस्ति। तथापि एतां नीतिं केवलं प्रशासनिकदस्तावेजत्वेन द्रष्टुं न युक्तम्। वस्तुतः एषा नीति भारतस्य शिक्षादृष्टेः पुनर्निर्धारणस्य गम्भीरः प्रयत्नः अस्ति।

तथापि एकः महत्त्वपूर्णः प्रश्नः उदेति— किं केवलं नीतौ भारतीयज्ञानपरम्परायाः उल्लेखेन शिक्षा भारतीयस्वरूपा भविष्यति?

अध्ययनकर्तायाः मते अस्य प्रश्नस्य उत्तरं "न" इति अस्ति।

भारतीयशिक्षादर्शनस्य यथार्थः पुनराविष्कारः तदा एव सम्भवः भविष्यति यदा—

- अध्यापकाः स्वयं भारतीयदार्शनिकपरम्पराभिः सम्यक् परिचिताः भवेयुः।
- अध्यापकप्रशिक्षणकार्यक्रमेषु भारतीयशिक्षादर्शनस्य व्यवहारिकः समावेशः क्रियेत।
- मूल्यशिक्षा पृथक् विषयत्वेन न स्थाप्येत, अपितु सम्पूर्णशिक्षणप्रक्रियायाः आधाररूपेण स्वीकृत्येत।
- मूल्याङ्कनव्यवस्थायां केवलं स्मरणशक्तेः न, अपि तु चिन्तनस्य, सृजनशीलतायाः, नैतिकनिर्णयक्षमतायाः च मूल्याङ्कनं क्रियेत।

अतः वक्तुम् शक्यते भारतीयशिक्षादर्शनस्य पुनराविष्कारः केवलं पाठ्यपुस्तकेषु न, अपितु विद्यालयस्य संस्कृतौ, अध्यापकानां आचरणे, विद्यार्थिनां जीवनमूल्येषु च प्रत्यक्षतया दृश्यः भवेत्।

## ९. राष्ट्रीयशिक्षानीतेः– २०२० प्रभावीक्रियान्वयनस्य प्रमुखाः चुनौतीः

राष्ट्रीयशिक्षानीतिः– २०२० भारतीयशिक्षादर्शनस्य पुनः प्रतिष्ठापनस्य महत्त्वपूर्णः प्रयासः अस्ति। किन्तु अस्याः सफलतायाः आधारः केवलं नीतेः उत्कृष्टता न, अपि तु तस्याः प्रभावी क्रियान्वयनम् अस्ति। भारतीयशिक्षादर्शनस्य मूलतत्त्वानि—समग्रविकासः, आत्मबोधः, मूल्याधारितशिक्षा तथा अनुभवाधारिताधिगमः—तदा एव सार्थकानि भविष्यन्ति यदा तानि व्यवहारतः शिक्षाव्यवस्थायां सम्यक् कार्यान्वितानि भविष्यन्ति।

### ९.१ अध्यापकप्रशिक्षणस्य चुनौती

शिक्षायाः वास्तविकः परिवर्तनः अध्यापकेभ्यः एव आरभ्यते। यदि अध्यापकाः भारतीयशिक्षादर्शनं, भारतीयज्ञानपरम्परां तथा राष्ट्रीयशिक्षानीतेः मूलभावनां सम्यक् न जानन्ति, तर्हि नीतेः उद्देश्याः व्यवहारे सफलतया न कार्यान्विताः भविष्यन्ति। अद्यापि अधिकांशेषु अध्यापकप्रशिक्षणकार्यक्रमेषु विषयज्ञानं परीक्षाप्रधानता च अधिकं दृश्यते। भारतीयदार्शनिकपरम्परा, मूल्याधारितशिक्षणम्, अनुभवाधारिताधिगमः तथा समग्रमूल्याङ्कनम् एतेषां पर्याप्तः समावेशः अद्यापि अपेक्षितः अस्ति।

### ९.२ परीक्षाकेन्द्रिता शिक्षाव्यवस्था

भारतीयशिक्षादर्शने अधिगमप्रक्रियायाः महत्त्वं प्रतिपादितम् अस्ति, किन्तु वर्तमानव्यवस्थायां परिणामः, अङ्काः तथा श्रेणीकरणम् अधिकं महत्त्वं प्राप्नुवन्ति।

डिजिटलप्रधानसंस्कृतिः विद्यार्थिनां सृजनशीलतां, जिज्ञासां तथा स्वतन्त्रचिन्तनक्षमतां सीमितां करोति। यावत् मूल्याङ्कनव्यवस्थायां व्यापकः परिवर्तनः न भविष्यति, तावत् समग्रशिक्षायाः अवधारणा पूर्णतया व्यवहारे न अवतरीष्यति।

### ९.३ भारतीयज्ञानपरम्परायाः पुनर्व्याख्यानस्य आवश्यकता

भारतीयज्ञानपरम्परा केवलं सांस्कृतिकगौरवरूपेण न प्रस्तोतव्या, अपि तु वैज्ञानिकदृष्ट्या, दार्शनिकदृष्ट्या, शोधपरम्परया च पुनः व्याख्यातव्या।

यदि सा समकालीनसन्दर्भेषु युक्तियुक्तरूपेण न प्रस्तूयेत, तर्हि विद्यार्थिनां कृते प्रेरणास्रोतः न भूत्वा केवलं ऐतिहासिकविवरणरूपेण एव अवशिष्येत।

### ९.४ संसाधनानाम् आधारभूतसंरचनायाश्च समस्या

राष्ट्रीयशिक्षानीतिः– २०२० अनुभवाधारिताधिगमं, प्रयोगशाला-शिक्षणं, अङ्कीयसंसाधनानि, बहुभाषिकशैक्षिकसामग्रीं तथा बहुविषयकशिक्षां प्रोत्साहयति।

किन्तु भारतस्य अनेकासु ग्रामीणदूरस्थविद्यालयेषु अद्यापि—

- प्रशिक्षिताध्यापकानां न्यूनता,
- डिजिटलसंसाधनानाम् अभावः,
- ग्रन्थालयप्रयोगशालयोः सीमितोपलब्धिः,
- अन्तर्जालसुविधायाः न्यूनता

इत्यादयः समस्याः विद्यमानाः सन्ति।

### ९.५ वैश्वीकरणस्य बाजारीकरणस्य च प्रभावः

समकालीनशिक्षा वैश्विकस्पर्धया तथा बाजारीकरणप्रधानेन अर्थतन्त्रेण अत्यधिकं प्रभावितास्ति। अतः शिक्षायाः मूल्यं प्रायः रोजगारे, वेतने तथा आर्थिकोत्पादकतायामेव मीयते।

भारतीयशिक्षादर्शनं तु व्यक्तेः नैतिकविकासं, सामाजिकोत्तरदायित्वं तथा आध्यात्मिकोन्नतिं समानमहत्त्वेन स्वीकरोति। अतः एतयोः दृष्ट्योः मध्ये सन्तुलनस्य स्थापना वर्तमानशिक्षायाः प्रमुखा चुनौती अस्ति।

## १०. सुझावाः (Recommendations)

राष्ट्रीयशिक्षानीतेः– २०२० सफलक्रियान्वयनाय निम्नलिखिताः सुझावाः उपस्थाप्यन्ते—

### १०.१ अध्यापकशिक्षायाः पुनर्गठनम्

बी.एड्., एम्.एड्. तथा अन्येषु अध्यापकप्रशिक्षणकार्यक्रमेषु भारतीयशिक्षादर्शनम्, भारतीयज्ञानपरम्परा, नैतिकशिक्षा, योगः, ध्यानम् तथा अनुभवाधारिताधिगमः व्यवहारिकरूपेण समावेश्याः।

### १०.२ मूल्याधारितशिक्षणसंस्कृतेः विकासः

मूल्यशिक्षा केवलं पृथक् विषयत्वेन न अध्यापनीया, अपि तु प्रत्येकस्मिन् विषये तथा शिक्षणक्रियायां समावेशनीया। विद्यालय-परिवेशः स्वयं नैतिकतायाः, सहयोगस्य, संवेदनशीलतायाः तथा लोकतान्त्रिकमूल्यानां जीवदुदाहरणं भवेत्।

### १०.३ भारतीयज्ञानपरम्परायाम् अनुसंधानस्य प्रोत्साहनम्

विश्वविद्यालयेषु तथा शोधसंस्थासु भारतीयज्ञानपरम्परायाः, शिक्षा-दर्शनस्य तथा स्थानीयज्ञानव्यवस्थानां विषये अन्तर्विषयकशोधः प्रोत्साहनीयः। एतेन भारतीयशिक्षादर्शनस्य आधुनिकसन्दर्भेषु पुनर्व्याख्यानं सम्भविष्यति।

### १०.४ बहुभाषिकशिक्षायाः स्थानीयज्ञानस्य च समावेशः

पाठ्यक्रमनिर्माणे स्थानीयइतिहासः, लोकज्ञानम्, लोककला, पारम्परिकविज्ञानम्, पर्यावरणज्ञानम् तथा भारतीयभाषाः समुचित-

स्थानं प्राप्नुयुः। एतेन शिक्षा अधिका सन्दर्भानुकूलाः सांस्कृतिकदृष्ट्या च समृद्धा भविष्यति।

### १०.५ मूल्याङ्कनव्यवस्थायाः परिवर्तनम्

मूल्याङ्कनस्य आधारः केवलं लिखितपरीक्षा न भवेत्, अपि तु—

- परियोजनाकार्यम्,
- नवोन्मेषः,
- समस्यासमाधानक्षमता,
- समूहकार्यकौशलम्,
- संवादकौशलम्,
- नैतिकनिर्णयक्षमता,
- सामाजिकउत्तरदायित्वम्

इत्यादयः पक्षाः अपि समावेश्याः।

### १०.६ कृत्रिमबुद्धिमत्तायाः भारतीयशिक्षादर्शनेन सह समन्वयः

भविष्यस्य शिक्षा केवलं प्रौद्योगिकीआधारिता न भविष्यति। कृत्रिमबुद्धिमत्तेः उपयोगः करुणया, विवेकेन, आत्मानुशासनेन तथा सामाजिकोत्तरदायित्वेन सह सन्तुलितः भवेत्। एष एव भविष्यशिक्षायाः यथार्थः आदर्शः।

## ११. मौलिकदृष्टिकोणम् (Author's Original Perspective)

अध्ययनकर्तायाः मते राष्ट्रीयशिक्षानीतेः– २०२० सर्वाधिकं महत्त्वम् अस्मिन् निहितम् अस्ति यत् एषा भारतीयज्ञानपरम्परायाः केवलं उल्लेखं न करोति, अपि तु शिक्षायाः वास्तविकलक्ष्यस्य विषये पुनः चिन्तनाय प्रेरयति। भारतीयशिक्षादर्शने आद्यप्रश्नः सदैव आसीत्— "मनुष्यः कीदृशः भवेत्?"

आधुनिकशिक्षायां तु प्रायः प्रश्नः भवति— "मनुष्यः किं कुर्यात्?" एतयोः प्रश्नयोः भेदः एव शिक्षायाः दिशां निर्धारितुं समर्थः अस्ति। यदि शिक्षा केवलं कौशलविकासं करोति, तर्हि सा दक्षं कर्मकरं निर्मातुं शक्नोति। परन्तु यदि शिक्षा आत्मबोधं, नैतिकविवेकं, सामाजिकोत्तरदायित्वं तथा मानवीयसंवेदनशीलतां विकसितुं समर्था भवति, तदा एव सा श्रेष्ठनागरिकान् उत्तरदायिमानवान् च निर्माति।

अध्ययनकर्तायाः अभिप्रायः अस्ति यत् राष्ट्रीयशिक्षानीतेः– २०२० वास्तविकसफलता तदा एव भविष्यति, यदा भारतीयशिक्षादर्शनं केवलं ग्रन्थेषु न तिष्ठेत्, अपि तु विद्यालयानां संस्कृतौ, अध्यापकानाम् आचरणे, विद्यार्थिनां जीवनमूल्येषु तथा समाजस्य सामूहिकचेतनायां प्रत्यक्षरूपेण दृश्येत।

अस्मिन् सन्दर्भे लेखकः नवीनां दार्शनिकावधारणां प्रस्तौति—

"भारतीयशिक्षायाःभविष्यं ज्ञानस्य डिजिटलीकरण (Digitalisation) न, अपि तु ज्ञानस्य मानवीकरणे (Humanisation of Knowledge) निहितम् अस्ति।"

एष एव अस्य शोधालेखस्य केन्द्रीयः दार्शनिकः प्रतिपादनः अस्ति

## १२. उपसंहारः (Conclusion)

राष्ट्रीयशिक्षानीतिः– २०२० भारतीयशिक्षाव्यवस्थायां केवलं संरचनात्मकपरिवर्तनस्य न, अपि तु गम्भीरस्य दार्शनिकपरिवर्तनस्य अपि सूचिका अस्ति। एषा नीति शिक्षां केवलम् आर्थिकविकासस्य अथवा रोजगारप्राप्तेः साधनं न मन्यते, अपि तु व्यक्तेः समग्रविकासस्य, आत्मबोधस्य, नैतिकचेतनायाः, सामाजिकउत्तर-दायित्वस्य तथा सांस्कृतिकआत्मविश्वासस्य आधाररूपेण स्वीकरोति।

प्रस्तुतेन अध्ययनेन स्पष्टं भवति यत् भारतीयशिक्षादर्शनस्य तथा राष्ट्रीयशिक्षानीतेः– २०२० मध्ये गाढः वैचारिकः सामञ्जस्यः विद्यते। समग्रशिक्षा, अनुभवाधारिताधिगमः, बहुविषयकशिक्षा, मातृभाषाशिक्षणम्, मूल्यशिक्षा, अनुसंधानसंस्कृतिः तथा भारतीयज्ञानपरम्परा—एते सर्वे अस्य सामञ्जस्यस्य प्रमुखाः आधाराः सन्ति। तथापि एतदपि स्मर्तव्यं यत् कस्यापि नीत्याः वास्तविकं मूल्यं तस्याः दस्तावेजे न, अपि तु प्रभावीक्रियान्वयने निहितम् अस्ति। यदि अध्यापकशिक्षायाम्, पाठ्यक्रमनिर्माणे, मूल्याङ्कनव्यवस्थायाम्, अनुसंधाने तथा शैक्षिकप्रशासने अपेक्षितः दार्शनिकः परिवर्तनः न भविष्यति, तर्हि नीतेः मूलभावना पूर्णतया साकारिता न भविष्यति। अतः निःसंशयं वक्तुं शक्यते यत् राष्ट्रीयशिक्षानीतिः– २०२० भारतीयशिक्षादर्शनस्य पुनराविष्कारस्य दिशि एकः सशक्तः प्रारम्भः अस्ति। किन्तु अस्य पुनराविष्कारस्य स्थायित्वाय प्रभावकारितायै च शिक्षायाः सर्वेषु स्तरेषु वैचारिकः, संस्थागतः तथा व्यवहारिकः परिवर्तनः अनिवार्यः अस्ति।

अयं शोधलेखः केवलं **राष्ट्रीयशिक्षानीतेः– २०२०** वर्णनं न करोति, अपि तु एकं नवीनं दार्शनिकप्रतिपादनम् अपि प्रस्तौति। तस्य मूलभावः अयं यत्— **"भारतीयशिक्षायाः वास्तविकं पुनर्जागरणं तदैव भविष्यति, यदा शिक्षायाः केन्द्रं 'सूचना' न, अपि तु 'आत्मबोधः' भविष्यति; तथा च ज्ञानस्य परमलक्ष्यं केवलं स्पर्धा न, अपि तु मनुष्यस्य समाजस्य च नैतिकः समग्रश्च उत्कर्षः भविष्यति।"** एतदेव अस्य शोधालेखस्य मौलिकं (Original) विशिष्टं (Scholarly Contribution) च विद्वत्परं योगदानम् अस्ति।

## सन्दर्भसूची (References)

### ग्रन्थाः


- अरविन्दः, श्री। (२०१८)। शिक्षायाः विषये निबन्धाः (हिन्दीसंस्करणम्)। पुदुच्चेरी: श्रीअरविन्दाश्रमः।
- गान्धी,मोहनदासकरमचन्दः।(२००९)।मूलभूतशिक्षा (नवशिक्षा)। अहमदाबादः: नवजीवनप्रकाशनम्।
- राधाकृष्णन्, सर्वपल्ली। (२००९)। भारतीयदर्शनम् (प्रथमः द्वितीयश्च भागः)। नवदेहली: राजपाल एण्ड सन्स।
- विवेकानन्दः, स्वामी। (२०१७)। स्वामिविवेकानन्दस्य सम्पूर्ण-वाङ्मयम् (हिन्दीसंस्करणम्)। कोलकाता: अद्वैताश्रमः।
- शर्मा, रामनाथः। (२०२१)। शिक्षादर्शनम्। आग्रा: आर. लाल बुक डिपो।
- भारतसर्वकारः,शिक्षामन्त्रालयः। (२०२०)। राष्ट्रीयशिक्षानीतिः– २०२०। नवदेहली: शिक्षामन्त्रालयः।
- राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद् (NCERT)। (२०२३)। राष्ट्रीय-पाठ्यचर्यारूपरेखा– २०२३ (विद्यालयशिक्षा)। नवदेहली।
- राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद् (NCERT)। (२०२३)। भारतीयज्ञानप्रणाली (Indian Knowledge Systems): स्थितिपत्रम्। नवदेहली।


### जालस्रोतांसि (Web Sources)


- UNESCO. (२०२१). Reimagining Our Futures Together: A New Social Contract for Education.
- OECD. (२०२१). The Future of Education and Skills 2030.